# ॥ सु-स्वागतम् ॥

प्रस्तोता – सत्यव्रत पाण्डेयः
प्राध्यापक – (वेद विभागः)
महर्षि पाणिनि संस्कृत वैदिक विश्व विद्यालय उज्जैन

# (५४) प्रयोगविधिः

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाङ्गवाक्यैकवाक्यतापन्नः प्रधानविधिरेव । स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे प्रमाणाभावादविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते । न च तदविलम्बेऽपि प्रमाणाभाव इति वाच्यम् । विलम्बे त्वङ्गप्रधानविध्येकवाक्या तावगततत्साहित्यानुपपत्तिः । विलम्बेन क्रियमाणयोः पदार्थयोरिदमनेन सहकृतमिति साहित्यव्यवहाराभावात् । स चाविलम्बो नियते क्रमे आश्रीयमाणे भवति । अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदन्तरं वेति प्रयोगविक्षेपापत्तेः । अतः प्रयोगविधिरेव स्वविधेयप्रयोग- प्राशुभावसिद्ध्यर्थं नियतक्रममपि पदार्थविशेषणतया विधत्ते । अत एवाङ्गानां क्रमबोधको विधिः प्रयोगविधिरित्यपि लक्षणम् ।।५४।।

# (५५) क्रमस्वरुपम्

तत्र क्रमो नाम वितातिविशेषः ।
पौर्वापर्यरूपो वा।।५५।।

# (५६) श्रुत्यादिषड्प्रमाणानि

तत्र षड्प्रमाणानि श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि । तत्र क्रमपरवचनं श्रुतिः । तच्च द्विविधम् । केवलक्रमपरं तद्विशिष्टपदार्थपरं चेति । तत्र 'वेदं कृत्वा वेदिं करोती'ति केवलक्रमपरम् । वेदिकरणादेर्वचनान्तरप्राप्तत्वात् । 'वषट्कर्तुः प्रथमभक्ष' इति तु क्रमविशिष्टपदार्थपरम् । एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् ।। ५६ ।।

# (५७) श्रुतिरितरप्रमाणापेक्षया बलवती

सेयं श्रुतिरितरप्रमाणापेक्षया बलवती । तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात् । अत एवाश्विनग्रहस्य पाठक्रमात्तृतीयस्थाने ग्रहणप्रसक्तावाश्विनो दशमो गृह्यत इति वचनात् । दशमस्थाने ग्रहणमित्युक्तम् ।। ५७ ।।

# (५८) अर्थक्रमलक्षणम्

यत्र प्रयोजनवशेन क्रमनिर्णयः सोऽर्थक्रमः ।
यथाऽग्निहोत्रं जुहोति, यवागूं पचतीत्यग्निहोत्रयवागूपाकयोः । अत्र हि यवाग्वा होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते ।। ५८ ।।

# (५९) अर्थक्रमः पाठक्रमाद्बलवान्

स चायं पाठक्रमाद्बलवान् । यथापाठं
ह्यनुष्ठाने क्लृप्त- प्रयोजनबाधोऽदृष्टार्थत्वं
च स्यात् । न हि होमानन्तरं
क्रियमाणस्य पाकस्य किंचिद् दृष्टं
प्रयोजनमस्ति ।। ५९ ।।

# (६०) पाठक्रमलक्षणम्

पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः । तस्माच्च पदार्थानां क्रम आश्रीयते । येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधी- तान्यर्थप्रत्ययं जनयन्ति । यथा प्रत्ययं च पदार्थानामनुष्ठानम् ।।६० ।।

# (६१) पाठक्रमद्वैविध्यम्

स च पाठो द्विविधः । मन्त्रपाठो ब्राह्मणपाठश्चेति । तत्राग्नेयाग्नीषोमीययोस्तत्तद्वाक्यानां याज्यानुवाक्यानां पाठाद्यः क्रम आश्रीयते स मन्त्रपाठात् ।। ६ १ ।।

# (६२) मन्त्रपाठो ब्राह्मणपाठाद्बलीयान्

स चायं मन्त्रपाठो ब्राह्मणपाठाद्बलीयान् । अनुष्ठाने ब्राह्मण-वाक्यापेक्षया मन्त्रपाठस्यान्तरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदं कर्तव्यमिति अवबोध्य कृतार्थम् । मन्त्राः पुनः प्रयोगकाले व्याप्रियन्ते । तेन अनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीनत्वाद् अन्तरङ्गोऽयं मन्त्रपाठ इति ।। ६२ ।।

# (६३) ब्राह्मणपाठात् क्रमः

प्रयाजानां ‘समिधो यजति’ ‘तनूनपातं यजति’ इत्येवं विधिपाठक्रमाद्यः क्रमः स ब्राह्मणपाठक्रमात् । यद्यपि ब्राह्मणवाक्यान्यर्थं विधाय कृतार्थानि तथापि प्रयाजादीनां क्रमस्मारकान्तरस्याभावात्तान्येव क्रमस्मारकत्वेन स्वीक्रियन्ते ।। ६ ३ ।।

# धन्यवाद